अष्टमः पाठः

# वृक्षैः समं भवतु मे जीवनम्

वसन्तकाले सौरभयुक्तैः
सन्ततिकाले दर्पविमुक्तैः
शीतातपयोः धैर्येण स्थितैः
वृक्षैः समं भवतु मे जीवनम्।

वर्षाकाले आह्लादयुक्तैः
शिशिरकाले निर्भीकचित्तैः
हेमन्तकाले समाधिस्थितैः
वृक्षैः समं भवतु मे जीवनम्।

क्षुधार्तेभ्यः फलसन्ततेः दानम्
शरणागतेभ्यः आश्रयदानम्
आतपार्तेभ्यः छायादानम्
वृक्षाणां व्रतं, तद्वत् स्यान्मे जीवनम्।

कृतं यैः सीतायाः सतीत्वरक्षणं
बुद्धस्य आत्मज्ञानस्य साक्ष्यम्
पाण्डवशस्त्राणां गोपनम्
वृक्षैः समं भवतु मे जीवनम्।

शुष्कतायां सम्प्राप्तायाम् अपि
यैः अर्प्यते जीवनं परेषां कृते
आत्मा वह्यते चुल्लिकायां यैः मुदा
वृक्षैः समं भवतु मे जीवनम्।

आ जन्मनः समर्पणम् आमरणं
लोकस्य हितायैव येषां जीवनम्
जीवनं मृतिश्चापि येषां सार्थकं
वृक्षैः समं भवतु मे जीवनम्।

## अभ्यासः

1. अस्य पाठस्य भावार्थं लिखत।
2. लोकस्य हिताय वृक्षाः किं किं कुर्वन्ति?

★★★